श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

सरलकविराघवाचार्य विरचितं

# ॥ श्रीदक्षिणशेषाचलेश श्रीनिवास भगवत्स्तोत्रम् ॥

## (श्रीप्रसन्नवेङ्कटेश स्तोत्रम्)

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीदक्षिणशेषाचलेश श्रीनिवास भगवत्स्तोत्रम् ॥

अयि दक्षिणशेषगिरीन्द्रशिर -
स्युररीकृतनित्यनिवास हरे।
रमयोरसि भास्वरया सुहितः
सुचिरञ्जय रञ्जय सज्जनताम् ॥ 1 ॥

भुवनत्रयभाग्यवशादुदितो
भुजगोत्तमभूमिधरोपरिगः।
रमया सहितस्स्वमनोरमया
दयमानमना विहरेह हरे ॥ 2 ॥

परिवर्धयितुं निजधर्मततिं
परिपालयितुं निजभक्तजनान्।
अपि पेषयितुं द्विषतोऽवतर -
स्यहहेह हरे समये समये ॥ 3 ॥

अवतारभिदास्वखिलासु भवान्
अजहत्परमेश गुणाद्यखिलम्।
विरहासहया रमया समया
प्रचकास्ति हरे भवतेऽस्तु नमः ॥ 4 ॥

नित्यसूरिनिषेवितं परमं पदं तदपि त्यजन्
दुस्सहा घविदूनदीन नमज्जनावन तत्परः।
देवदेव भुजङ्गशैलशिरश्रितोऽसि सहश्रिया
त्वत्पदांबुजकिङ्करान्परिपालयाच्युत मादृशान् ॥ 5 ॥

मीनवपुरेत्य स भवानुदधिमध्ये
    वेदगणचोरमधुकैटभनिहन्ता।
वेध उपगीतमहिमा व्यभवदद्धा
    सर्वगुणपूर्ण भगवन्मम नमस्ते॥ **6**॥

मन्दरगिरिं पयसि मग्न मुपरुध्य
    त्वय्यहह कच्छपपते वहति पृष्ठे।
मन्थनकृतस्सुरवरा अमृतमाश्नन्
    देवगणपूजित हरे मम नमस्ते॥ **7**॥

भूमिमपहृत्य बहुधर्मजनिभूमिं
    सिन्धुजलमध्यमधिगत्य च निलीनम्।
दैत्यमभिहत्य किटिरूप उदधारी
    स्तां त्रियुग भूदयित भो मम नमस्ते॥ **8**॥

त्रासितरिपुव्रज महाट्ट हसितैः स्वै -
    र्नाथ नरसिंह नयनारुणिमयोगात्।
क्रोधनमरौ प्रियतमे प्रसदनं है
    द्राक् कलयतेऽद्भुततनो मम नमस्ते॥ **9**॥

कृष्णमृगचर्मकृतसंवरणलक्ष्मीः
    वामनवटो बलिमुपेत्य यदयाचीः।
तेन फलिनोऽजनिषतेन्द्रबलिलोकाः
    त्रिः कृतसुविक्रम हरे मम नमस्ते॥ **10**॥

साधितफले भृगुपते त्वदवतारे
    मैथिलसुतारमणमेत्य पथि रामम्।
वैष्णवशरासनमहोऽर्पणमकार्षी -
    रास्थिततपस्य भगवन्मम नमस्ते॥ **11**॥

राम इति यस्य तव नाम निजजप्यं
    वक्ति गिरिशो रहसि पर्वतकुमारीम्।
सर्वजनभव्यद सकृत्प्रणतिमात्रात्
    मैथिलसुतारमण राघव नमस्ते॥ **12** ॥

राम भवदीयसहभावविरहाभ्यां
    हृष्यति विशुष्यति भवन्तमनुजातः।
तादृगनुचारकृतिमोदितमुरारे
    श्रीधर बलाढ्य भवतान्मम नमस्ते॥ **13** ॥

कृष्ण ! भवतो वदनपद्मत उदीता
    पार्थमपदिश्य समराग्रभुवि गीता।
भाति जनतावृजिनशोषणशुभार्था
    सज्जनशरण्यचरणांबुज नमस्ते॥ **14** ॥

विष्णुयशसस्सुततया कलियुगान्ते
    कर्कमधिरुह्य करदीप्रकरवाळः।
दुष्टजनतामिह निहत्य च सरोषं
    वैदिकपथं पुनरविष्यसि नमस्ते॥ **15** ॥

ऋते श्रीनिवासं गतिर्नो गतिर्नो
    सदा श्रीनिवासं स्मराणि स्मराणि।
मयि श्रीनिवास प्रसीदेः प्रसीदेः
    शुभं श्रीनिवास प्रदद्याः प्रदद्याः॥ **16** ॥

दयालो रमेश त्वदीयाङ्घ्रिपद्मौ
    सुदूरादिहागत्य भक्त्या निषेवे।
सदासेविनां यत्फलं स्यात्तदेतत्
    सकृत्सेविने मे प्रदेहि प्रदेहि॥ **17** ॥

अशेषानपि मेदोषान् श्रीनिवास प्रमादजान्।
क्षमेथास्त्वं क्षमेथास्त्वं देवदेव दयानिधे॥ **18** ॥

गोविन्दोपासनपर सीतारामो नाम त्वत्प्रियकारी।
लक्ष्मीवास त्वज्जनहृद्यो जीयादस्यां भुवि शतमब्दान्॥ **19** ॥

सुरनरकीर्तनगोचरपावनमङ्गलनामसहस्र विभो
    फणिपतिशेषमहीधरशृङ्गविभूषणसुन्दरमन्दिर भोः।
कमलगृहामृदुपाणिसरोरुहसंवहनासहपादयुग
    त्वमिह हरे विहरस्व चिरं विनमज्जनताशुभदायितया॥ **20** ॥

शेषभूमिधरशृङ्गविहारि
    श्रीनिवासभगवत्परितुष्ट्यै।
स्तोत्रमेतदुदगीयत भक्त्या
    राघवेण कविना सरलेन॥ **21** ॥

॥ इति श्रीदक्षिणशेषाचलेश श्रीनिवास भगवत्स्तोत्रमं समाप्तम्॥